# Shri Minakshi Suprabhatam

# શ્રીમીનાક્ષીસુપ્રભાતમ્

## Document Information

Text title : Shri Minakshi Suprabhatam

File name : mInAkShIsuprabhAtam.itx

Category : devii, mInAkShI, suprabhAta

Location : doc_devii

Author : Anantanandanatha

Proofread by : Rajesh Thyagarajan

Description/comments : Minakshi stutimanjari and Halasya Mahatmyam edited by by SV Radhakrishna Sastri

Latest update : May 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2023

*sanskritdocuments.org*

Shri Minakshi Suprabhatam

# શ્રીમીનાક્ષીસુપ્રભાતમ્

શ્રીસ્વામિશાસ્ત્રિણા અનન્તાનન્દનાથેન વિરચિતં
ૐ નમો ભગવત્યૈ શ્રીચન્દ્રશેખરમૂર્તયે ।
સચ્ચિદાનન્દરૂપિણ્યૈ સ્વાત્મબોધપ્રપૂર્તયે ॥

શ્રીમાન્ ગજાસ્યો મધુરાપુરસ્થો લમ્બોદરો મીનદૃગાત્મજો યઃ ।
ત્રિપ્રસ્થપૂર્ણાકૃતિમોદકાઢ્યઃ ક્રિયાદ્ગણેશો મમ સુપ્રભાતમ્ ॥ ૧॥

માતઙ્ગકન્યેતિ કવીન્દ્રવન્દ્યા વિદ્યાવતીપુણ્યફલપ્રદા યા ।
શ્રીપાણ્ડ્યરાજસ્ય સુતા ચ સાઽમ્બા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૨॥

ચિદગ્નિજાતા મધુરાપુરેશી પટ્ટાભિષિક્તા મલયધ્વજેન ।
યયા જિતા દિક્પતયો નૃપાશ્ચ કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૩॥

યા ત્રિસ્તનીશાનજયાય ગત્વા દૃષ્ટ્વા મહેશં ત્વતિસુન્દરાઙ્ગમ્ ।
સમ્મોહિતાઽભૂજ્જનમોહદાત્રી કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૪॥

શ્રીસુન્દરેશેક્ષણમાત્રલુપ્તમધ્યસ્તની શાન્તમહેશયુદ્ધા ।
મીનામ્બકા શ્રીમધુરાપુરેશી કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૫॥

વાક્કામશક્ત્યાદિમબીજપૂર્વમન્ત્રસ્ય લક્ષ્યાર્થતનુર્મહેશી ।
ષડઙ્ગશક્ત્યાવૃતબિન્દુવાસા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૬॥

પરપ્રકાશાદિમશઙ્કરાન્ત શ્રીદિવ્યસિદ્ધૌઘસુમાનવૌઘૈઃ ।
સદા પરીતા ગુરુભિઃ સ્વચક્રે કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૭॥

રત્યાદિ શક્તિત્રયપઞ્ચબાણબાણૈશ્ચ કામાદિમપઞ્ચમારૈઃ ।
યા સેવિતા મીનનિભસ્વનેત્રા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૮॥

બ્રાહ્મ્યાદિશક્ત્યષ્ટકસેવિતા યા લક્ષ્મ્યાદિશક્ત્યષ્ટકસંશ્રિતાઽમ્બા ।
કદમ્બકાન્તારતલૈકવાસા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૯॥

વજ્રાદિસંશોભિતહસ્તપદ્મ વામાદિભિષ્ષોડશશક્તિભિર્યા ।

સમાવૃતા સા પ્રિયકપ્રિયામ્બા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૦॥

ત્રિશૂલસંશોભિકરાસિતાઙ્ગમુખ્યૈર્વૃતા હ્યષ્ટસુભૈરવૈર્યા ।
મીનામ્બકા નીપવનૈકવાસા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૧॥

માતઙ્ગિનીપૂર્વકશક્તિસઙ્ઘૈઃ ગણેશપૂર્વત્રિદિવૈશ્ચતુર્ભિઃ ।
શુકપ્રિયાઽમ્બા પરિસેવ્યમાના કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૨॥

શ્રીશારિકાવેણુવિપઞ્ચિકાઢ્યા શ્રીદ્વાદશાન્તસ્થમતઙ્ગકન્યા ।
યા વૈ લઘુશ્યામતનુર્ઝષાક્ષી કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૩॥

વાગ્વાદિની યા નકુલીતિ દેવી સઙ્કીર્ત્યતે સિદ્ધજનૈઃ પ્રપઞ્ચે ।
કવિત્વદા કામિતદા ઝષાક્ષી કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૪॥

સમસ્વરાણામપિ લક્ષ્યભૂતા સઙ્ગીતયોગિન્યભિધીયતે યા ।
સાનન્દરૂપા ઝષલોચનામ્બા કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૫॥

સચ્ચિત્સ્વરૂપા ભવસઙ્ગરે મે જયપ્રદા ચન્દ્રકલાવતંસા ।
ગુરુસ્વરૂપા મધુરાપુરેશી કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૬॥

સ્વર્ણાબ્જિનીતીરવિહારશીલપદામ્બુજા વર્ણતનૂરપર્ણા ।
ભવાન્ધતામિસ્રસમાવૃતસ્ય કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૭॥

અનન્તનાગેન્દ્રશયાનવિષ્ણુ સહોદ્ભવા નીલતનુર્ઝષાક્ષી ।
અનન્તકલ્યાણગુણૈકભૂમિઃ કરોતુ દેવી મમ સુપ્રભાતમ્ ॥ ૧૮॥

ઇતિ અનન્તાનન્દનાથેન વિરચિતં શ્રીમીનાક્ષીસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Minakshi Suprabhatam*
pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*